# अध्याय ५

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।

ud√ac I P.– поднимать, выталкивать, продолжать, выступать;

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।

खं ब्रह्म । खं पुराणम् । वायुरं खम् ।

kha *n* – дыра, отверстие; воздушное пространство, небо;

इति ह स्माह कौरव्यायणीपुत्रः ।

kauravyāyaṇī – *nom.pr.;*

वेदोऽयं ब्राह्मणा विदुः ।

वेदैनेन यद्वेदितव्यम् ॥ ५.१.१ ॥

इति श्रीबृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य प्रथमं ब्राह्मणम् ॥ १ ॥

त्रयाः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुः । देवा मनुष्या असुराः ।

उषित्वा ब्रह्मचर्यं देवा ऊचुर्ब्रवीतु नो भवानिति ।

तेभ्यो हैतदक्षरमुवाच द इति ।

व्यज्ञासिष्टा३ इति । व्यज्ञासिष्मेति होचुः ।

दाम्यतेति न आत्थेति ।

ओमिति होवाच व्यज्ञासिष्टेति ॥ ५.२.१ ॥

अथ हैनं मनुष्या ऊचुर्ब्रवीतु नो भवानिति ।

तेभ्यो हैतदेवाक्षरमुवाच द इति ।

व्यज्ञासिष्टा३ इति । व्यज्ञासिष्मेति होचुः ।

दत्तेति न आत्थेति ।

ओमिति होवाच व्यज्ञासिष्टेति ॥ ५.२.२ ॥

अथ हैनमसुरा ऊचुर्ब्रवीतु नो भवानिति ।

तेभ्यो हैतदेवाक्षरमुवाच द इति ।

व्यज्ञासिष्टा३ इति । व्यज्ञासिष्मेति होचुः ।

दयध्वमिति न आत्थेति ।

√day Ā. – уделять, принимать участие в ч.-л., быть сострадательным;

ओमिति होवाच व्यज्ञासिष्टेति ।

तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुर्द द द इति ।

दम्यत दत्त दयध्वमिति ।

तदेतत्त्रयं शिक्षेद्दमं दानं दयामिति ॥ ५.२.३ ॥

इति बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य द्वितीयं ब्राह्मणम् ॥२॥

एष प्रजापतिर्यद्धृदयम् । एतद्ब्रह्म । एतत्सर्वम् ।

तदेतत्त्र्यक्षरं हृदयमिति ।

हृ इत्येकमक्षरम् । अभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद ।

द इत्येकमक्षरम् । ददत्यस्मै स्वाश्चान्ये च य एवं वेद ।

यमित्येकमक्षरम् । एति स्वर्गं लोकं य एवं वेद ॥ ५.३.१ ॥

तद्वै तदेतदेव तदास सत्यमेव ।

स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमांल्लोकान् ।

yakṣa *n* – сверхъестественное существо, дух; *m* якши, полубоги из свиты Куберы;

जित इन्न्वसावसत् य एवमेतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति ।

सत्यं ह्येव ब्रह्म ॥ ५.४.१ ॥

इति श्रीमद्बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य चतुर्थं ब्राह्मणम् ॥४॥

आप एवेदमग्र आसुः । ता आपः सत्यमसृजन्त । सत्यं ब्रह्म ।

ब्रह्म प्रजापतिम् । प्रजापतिर्देवान् ।

ते देवाः सत्यमेवोपासते ।

तदेतत्त्र्यक्षरं सतियमिति । स इत्येकमक्षरम् । तीत्येकमक्षरम् । यमित्येकमक्षरम् ।

प्रथमोत्तमे अक्षरे सत्यं मध्यतोऽनृतम् ।

तदेतदनृतमुभयतः सत्येन परिगृहीतम् । सत्यभूयमेव भवति ।

satyabhūya *n* – истинность, истина;

नैवंविद्वांसमनृतं हिनस्ति ॥ ५.५.१ ॥

तद्यत्तत्सत्यमसौ स आदित्यः ।

य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन् पुरुषस्तावेतावन्योऽन्यस्मिन् प्रतिष्ठितौ ।

रश्मिभिरेषोऽस्मिन् प्रतिष्ठितः प्राणैरयममुष्मिन् ।

स यदोत्क्रमिष्यन् भवति शुद्धमेवैतन्मण्डलं पश्यति । नैनमेते रश्मयः प्रत्यायन्ति ॥ ५.५.२ ॥

य एष एतस्मिन्मण्डले पुरुषस्तस्य भूरिति शिरः ।

एकं शिर एकमेतदक्षरम् ।

भुव इति बाहू । द्वौ बाहू द्वे एते अक्षरे ।

स्वरिति प्रतिष्ठा । द्वे प्रतिष्ठे द्वे एते अक्षरे ।

pratiṣṭhā *f* – опора, основание; нога;

तस्योपनिषदहरिति ।

हन्ति पाप्मानं जहाति च य एवं वेद ॥ ५.५.३ ॥

योऽयं दक्षिणेऽक्षन् पुरुषस्तस्य भूरिति शिरः ।

एकं शिर एकमेतदक्षरम् ।

भुव इति बाहू । द्वौ बाहू द्वे एते अक्षरे ।

स्वरिति प्रतिष्ठा । द्वे प्रतिष्ठे द्वे एते अक्षरे ।

तस्योपनिषदहमिति ।

हन्ति पाप्मानं जहाति च य एवं वेद ॥ ५.५.४ ॥

इति श्रीमद्बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य पञ्चमं ब्राह्मणम् ॥५॥

मनोमयोऽयं पुरुषो भाःसत्यः ।

तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा ।

स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किञ्च ॥ ५.६.१ ॥

इति श्रीमद्बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य षष्ठं ब्राह्मणम् ॥६॥

विद्युद्ब्रह्मेत्याहुः । विदानाद्विद्युत् ।

vidāna *n* – разделение, расчленение, распространение;

विद्यत्येनं पाप्मनो य एवं वेद विद्युद्ब्रह्मेति । विद्युध्येव ब्रह्म ॥ ५.७.१ ॥

√vid (vidyati?) – находиться, существовать;

इति श्रीमद्बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य सप्तमं ब्राह्मणम् ॥७॥

वाचं धेनुमुपासीत ।

तस्याश्चत्वारः स्तनाः । स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारः ।

तस्यै द्वौ स्तनौ देवा उपजीवन्ति । स्वाहाकारं च वषट्कारं च ।

हन्तकारं मनुष्याः । स्वधाकारं पितरः ।

तस्याः प्राण ऋषभो मनो वत्सः ॥ ५.८.१ ॥

इति श्रीमद्बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्याष्टमं ब्राह्मणम् ॥८॥

अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे ।

येनेदमन्नं पच्यते । यदिदमद्यते ।

तस्यैष घोषो भवति । यमेतत्कर्णावपिधाय श्रृणोति ।

स यदोत्क्रमिष्यन् भवति नैनं घोषं श्रृणोति ॥ ५.९.१ ॥

इति श्रीमद्बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य नवमं ब्राह्मणम् ॥९॥

यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति ।

तस्मै स तत्र विजिहीते यथा रथचक्रस्य खम् ।

vi√hā III Ā. - раскрываться, зевать;

तेन स ऊर्ध्व आक्रमते । स आदित्यमागच्छति ।

तस्मै स तत्र विजिहीते । यथा लम्बरस्य खम् ।

lambara *m* – вид барабана;

तेन स ऊर्ध्व आक्रमते । स चन्द्रमसमागच्छति ।

तस्मै स तत्र विजिहीते । यथा दुन्दुभेः खम् ।

तेन स ऊर्ध्व आक्रमते । स लोकमागच्छत्यशोकमहिमम् ।

तस्मिन् वसति शाश्वतीः समाः ॥ ५.१०.१ ॥

इति श्रीमद्बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य दशमं ब्राह्मणम् ॥१०॥

एतद्वै परमं तपो यद्व्याहितस्तप्यते ।

vyāhita – больной;

परमं हैव लोकं जयति य एवं वेद ।

एतद्वै परमं तपो यं प्रेतमरण्यं हरन्ति ।

परमं हैव लोकं जयति य एवं वेद ।

एतद्वै परमं तपो यं प्रेतमग्नावभ्यादधति ।

परमं हैव लोकं जयति य एवं वेद ॥ ५.११.१ ॥

इति श्रीमद्बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्यैकादशं ब्राह्मणम् ॥ ११ ॥

अन्नं ब्रह्मेत्येक आहुः ।

तन्न तथा । पूयति वा अन्नमृते प्राणात् ।

प्राणो ब्रह्मेत्येक आहुः ।

तन्न तथा ।शुष्यति वै प्रण ऋतेऽन्नात् ।

एते ह त्वेव देवते एकधाभूयं भूत्वा परमतां गच्छतः ।

तद्ध स्माह प्रातृदः पितरम् ।

prātṛda – *nom.pr.*

किं स्विदेवैवं विदुषे साधु कुर्यां किमेवास्मा असाधु कुर्यामिति ।

स ह स्माह पाणिना मा प्रातृद ।

कस्त्वेनयोरेकधाभूयं भूत्वा परमतां गच्छतीति ।

तस्मा उ हैतदुवाच वीति ।

अन्नं वै वि । अन्ने हीमानि सर्वाणि भूतानि विष्टानि ।

रमिति । प्राणो वै रम् ।

प्राणे हीमानि सर्वाणि भूतानि रमन्ते ।

सर्वाणि ह वा अस्मिन् भूतानि विशन्ति । सर्वाणि भूतानि रमन्ते य एवं वेद ॥ ५.१२.१ ॥

इति श्रीमद्बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य द्वादशं ब्राह्मणम् ॥ १२ ॥

उक्थम् । प्राणो वा उक्थम् । प्राणो हीदं सर्वमुत्थापयति ।

uktha *n* – хвала, хвалебный гимн; призыв, обращение; вид рецитации стихов в ритуале;

उद्धास्मादुक्थविद्वीरस्तिष्ठति । उक्थस्य सायुज्यं सलोकतां जयति य एवं वेद ॥ ५.१३.१ ॥

यजुः । प्राणो वै यजुः ।

प्राणे हीमानि सर्वाणि भूतानि युज्यन्ते ।

युज्यन्ते हास्मै सर्वाणि भूतानि श्रैष्ठ्याय ।

śraiṣṭhya *n* – преимущество, первенство; великолепие;

यजुषः सायुज्यं सलोकतां जयति य एवं वेद ॥ ५.१३.२ ॥

साम । प्राणो वै साम ।

प्राणे हीमानि सर्वाणि भूतानि सम्यञ्चि ।

सम्यञ्चि हास्मै सर्वाणि भूतानि श्रैष्ठ्याय कल्पन्ते ।

साम्नः सायुज्यं सलोकतां जयति य एवं वेद ॥ ५.१३.३ ॥

क्षत्रम् । प्राणो वै क्षत्रम् । प्राणो हि वै क्षत्रम् ।

त्रायते हैनं प्राणः क्षणितोः ।

kṣaṇitos – ved. inf.;

प्र क्षत्रमत्रमाप्नोति । क्षत्रस्य सायुज्यं सलोकतां जयति य एवं वेद ॥ ५.१३.४ ॥

इति श्रीमद्बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य त्रयोदशं ब्राह्मणम् ॥१३॥

भूमिरन्तरिक्षं द्यौरित्यष्टावक्षराणि ।

अष्टाक्षरं ह वा एकं गायत्र्यै पदम् ।

एतदु हैवास्या एतत् ।

स यावदेषु त्रिषु लोकेषु तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥ ५.१४.१ ॥

ऋचो यजूंषि सामानीत्यष्टावक्षराणि ।

अष्टाक्षरं ह वा एकं गायत्र्यै पदम् ।

एतदु हैवास्या एतत् ।

स यावतीयं त्रयी विद्या तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥ ५.१४.२ ॥

प्राणोऽपानो व्यान इत्यष्टावक्षराणि ।

अष्टाक्षरं ह वा एकं गायत्र्यै पदम् ।

एतदु हैवास्या एतत् ।

स यावदिदं प्राणि तावद्ध जयति योऽस्या एतदेवं पदं वेद ।

अथास्या एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति ।

darśata - видный, видимый; красивый;

यद्वै चतुर्थं तत्तुरीयम् ।

दर्शतं पदमिति ददृश इव ह्येषः ।

परोरजा इति सर्वमु ह्येवैष रज उपर्युपरि तपति ।

एवं हैव श्रिया यशसा तपति योऽस्या एतदेवं पदं वेद ॥ ५.१४.३ ॥

सैषा गायत्र्येतस्मिंस्तुरीये दर्शते पदे परोरजसि प्रतिष्ठिता ।

तद्वै तत्सत्ये प्रतिष्ठितम् ।

चक्षुर्वै सत्यम् । चक्षुर्हि वै सत्यम् ।

तस्माद्यदिदानीं द्वौ विवदमानावेयातमहमदर्शमहमश्रौषमिति ।

य एवं ब्रूयादहमदर्शमिति । तस्मा एव श्रद्दध्याम ।

तद्वै तत्सत्यं बले प्रतिष्ठितम् ।

प्राणो वै बलम् । तत्प्राणे प्रतिष्ठितम् ।

तस्मादाहुर्बलं सत्यादोगीय इति ।

ogīyaṃs - *cpv.* от ugra;

एवं वैषा गायत्र्यध्यात्मं प्रतिष्ठिता ।

सा हैषा गयांस्तत्रे ।

gaya *m pl.* – жизненное дыхание;

प्राणा वै गयाः । तत्प्राणास्तत्रे ।

तद्यद्गयांस्तत्रे तस्माद्गायत्री नाम ।

स यामेवामूं सावित्रीमन्वाहैषैव सा ।

anv√ah (pf.) – произносить;

स यस्मा अन्वाह तस्य प्राणांस्त्रायते ॥ ५.४.४ ॥

तां हैतामेके सावित्रीमनुष्टुभमन्वाहुः ।

वागनुष्टुप् । एतद्वाचमनुब्रूम इति ।

न तथा कुर्यात् ।

गायत्रीमेव सावित्रीमानुब्रूयात् ।

यदि ह वा अप्येवंविद्बह्विव प्रतिगृह्णाति न हैव तद्गायत्र्या एकं चन पदं प्रति ॥ ५.१४.५ ॥

स य इमांस्त्रींल्लोकान् पूर्णान् प्रतिगृह्णीयात्सोऽस्या एतत्प्रथमं पदमाप्नुयात् ।

अथ यावतीयं त्रयी विद्या यस्तावत्प्रतिगृह्णीयात्सोऽस्या एतद्द्वितीयं पदमाप्नुयात् ।

अथ यावदिदं प्राणि यस्तावत्प्रतिगृह्णीयात्सोऽस्या एतत्तृतीयं पदमाप्नुयात् ।

अथास्या एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति । नैव केन चनाप्यम् ।

कुत उ एतावत्प्रतिगृह्णीयात् ॥ ५.१४.६ ॥

तस्या उपस्थानम् ।

upasthāna *n* - прислуживание; уважение, почитание;

गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पदि ।

अपदसि । न हि पद्यसे ।

नमस्ते तुरीयाय दर्शताय पदाय परोरजसे ।

असावदो मा प्रापदिति । यं द्विष्यादसावस्मै कामो मा समर्धीति वा ।

न हैवास्मै स कामः समृध्यते यस्मा एवमुपतिष्ठते ।

अहमदः प्रापमिति वा ॥ ५.१४.७ ॥

एतद्ध वै तज्जनको वैदेहो बुडिलमाश्वतराश्विमुवाच यन्नु हो तद्गायत्रीविदब्रूथाः ।

buḍila āśvatarāśvi – *nom. pr.;*

अथ कथं हस्तीभूतो वहसीति ।

मुखं ह्यस्याः सम्राण्न विदां चकरेति होवाच ।

तस्या अग्निरेव मुखम् ।

यदि ह वा अपि बह्विवाग्नावभ्यादधति सर्वमेव तत्संदहति ।

एवं हैवैवंविद्यद्यपि बह्विव पापं कुरुते सर्वमेव तत्संप्साय शुद्धः पूतोऽजरोऽमृतः संभवति ॥ ५.१४.८ ॥

saṃpsāya *adv.* – тщательно пережевывать, откусывать кусочками;

इति श्रीमद्बृहदारण्यकोपनिषद्भाष्ये पञ्चमाध्यायस्य चतुर्दशं ब्राह्मणम् ॥१४॥

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।

तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ।

पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् समूह तेजः ।

यत्ते रूपं कल्याणतमं तत्ते पश्यामि योऽसावसौ पुरुषः सोऽहमस्मि ।

वायुरनिलममृतमथेदं भस्मान्तं शरीरम् ।

ओं क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर ।

kratu *m* – сила, мощь, способность, разум, дело, жертвоприношение;

अग्ने नय सुपथा रायेऽस्मान् विश्वानि देव वयुनानि विद्वान् ।

vayuna – движущийся; *n* правило, порядок, знание, искусство, путь;

युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमौक्तिं विधेम ॥ ५.१५.१ ॥

√yu III P. – отделять, удалять;
√hvar I P. – сбиться с пути, колебаться, заблуждаться, обходить; (здесь p.pf.Ā.)
ukti *f* – слово, выражение, речь, пение;

इति श्रीमद्बृहदारण्यकोपनिषदि पञ्चमाध्यायस्य पञ्चदशं ब्राह्मणम् ॥ १५ ॥

इति बृहदारण्यकोपनिषदि पञ्चमोध्यायः ॥५॥

# अध्याय ६

यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति ।

प्राणो वै ज्येष्ठश्च श्रेष्ठश्च ।

ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति ।

अपि च येषां बुभूषति य एवं वेद ॥ ६.१.१ ॥

यो ह वै वसिष्ठां वेद वसिष्ठः स्वानां भवति ।

वाग्वै वसिष्ठा ।

वसिष्ठः स्वानां भवति । अपि च येषां बुभूषति य एवं वेद ॥ ६.१.२ ॥

यो ह वै प्रतिष्ठां वेद प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे ।

चक्षुर्वै प्रतिष्ठा ।

चक्षुषा हि समे च दुर्गे च प्रतितिष्ठति ।

प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे य एवं वेद ॥ ६.१.३ ॥

यो ह वै संपदं वेद सं हास्मै पद्यते यं कामं कामयते ।

श्रोत्रं वै संपत् ।

श्रोत्रे हीमे सर्वे वेदा अभिसंपन्नाः ।

सं हास्मै पद्यते यं कामं कामयते य एवं वेद ॥ ६.१.४ ॥

abhisaṃ√pad IV Ā. – становиться, изменяться, приходить

यो ह वा आयतनं वेदायतनं स्वानां भवत्यायतनं जनानाम् ।

मनो वा आयतनम् ।

आयतनं स्वानां भवत्यायतनं जनानां य एवं वेद ॥ ६.१.५ ॥

यो ह वै प्रजातिं वेद प्रजायते ह प्रजया पशुभिः ।

रेतो वै प्रजातिः । प्रजायते ह प्रजया पशुभिर्य एवं वेद ॥ ६.१.६ ॥

prajāti *f* - рождение, размножение;

ते हेमे प्राणा अहंश्रेयसे विवदमाना ब्रह्म जग्मुः ।

तद्धोचुः को नो वसिष्ठ इति ।

तद्धोवाच यस्मिन् व उत्क्रान्त इदं शरीरं पापियो मन्यते स वो वसिष्ठ इति ॥ ६.१.७ ॥

वाग्घोच्चक्राम ।

सा संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ।

ते होचुः यथा कला अवदन्तो वाचा प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वांसो मनसा प्रजायमाना रेतसैवमजीविष्मेति ।

प्रविवेश ह वाक् ॥ ६.१.८ ॥

kala - немой, тихий, нежный;

चक्षुर्होच्चक्राम ।

तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ।

ते होचुः यथान्धा अपश्यन्तश्चक्षुषा प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण विद्वांसो मनसा प्रजायमाना रेतसैवमजीविष्मेति ।

प्रविवेश ह चक्षुः ॥ ६.१.९ ॥

श्रोत्रं होच्चक्राम ।

तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ।

ते होचुः यथा बधिरा अशृण्वन्तः श्रोत्रेण प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा विद्वांसो मनसा प्रजायमाना रेतसैवमजीविष्मेति ।

प्रविवेश ह श्रोत्रम् ॥ ६.१.१० ॥

मनो होच्चक्राम ।

तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ।

ते होचुः यथा मुग्धा अविद्वांसो मनसा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण प्रजायमाना रेतसैवमजीविष्मेति ।

प्रविवेश ह मनः ॥ ६.१.११ ॥

रेतो होच्चक्राम ।

तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ।

ते होचुः यथा क्लीबा अप्रजायमाना रेतासा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वांसो

मनसैवमजीविष्मेति ।

प्रविवेश ह रेतः ॥ ६.१.१२ ॥

अथ ह प्राण उत्क्रमिष्यन् यथा महासुहयः सैन्धवः पड्वीशशङ्कून्त्संवृहेदेवं हैवेमान् प्राणान्त्संववर्ह ।

saindhava - морской; с берегов Инда;
paḍvīśa (paḍbiśa) *n* – кандалы, оковы, путы;
śanku *m* – колышек; столб; колючка;
saṃ√vṛh (saṃ√bṛh) I P. – вырывать, извлекать;

ते होचुः मा भगव उत्क्रमीः ।

न वै शक्ष्यामस्त्वदृते जीवितुमिति ।

तस्यो मे बलिं कुरुतेति । तथेति ॥ ६.१.१३ ॥

सा ह वागुवाच यद्वा अहं वसिष्ठास्मि त्वं तद्वसिष्ठोऽसीति ।

यद्वा अहं प्रतिष्ठास्मि त्वं तत्प्रतिष्ठोऽसीति चक्षुः ।

यद्वा अहं संपदस्मि त्वं तत्संपदसीति श्रोत्रम् ।

यद्वा अहमायतनमस्मि त्वं तदायतनमसीति मनः ।

यद्वा अहं प्रजातिरस्मि त्वं तत्प्रजातिरसीति रेतः ।

तस्यो मे किमन्नं किं वास इति ।

यदिदं किञ्चा श्वभ्य आ कृमिभ्य आ कीटपतङ्गेभ्यस्तत्तेऽन्नम् ।

आपो वास इति ।

न ह वा अस्यानन्नं जग्धं भवति नानन्नं प्रतिगृहीतं य एवमेतदनस्यान्नं वेद ।

ana *m* – дыхание;

तद्विद्वांसः श्रोत्रिया अशिष्यन्त आचामन्त्यशित्वाचामन्ति ।

एतमेव तदन्नमनग्नं कुर्वन्तो मन्यन्ते ॥ ६.१.१४ ॥

इति बृहदारण्यकोपनिषदि षष्ठाध्यायस्य प्रथमं ब्राह्मणम् ॥ १ ॥

श्वेतकेतुर्वा आरुणेयः पञ्चालानां परिषदमाजगाम ।

śvetaketu āruṇeya – *nom.pr.*;

स आजगाम जैवलिं प्रवाहणं परिचारयमाणम् ।

jaivali pravāhaṇa – *nom.pr.*;
√paricāraya *den.* - гулять, прислуживать;

तमुदीक्ष्याभ्युवाद कुमारा३ इति । स भो३ इति प्रतिशुश्राव ।

अनुशिष्टो न्वसि पित्रेति । ओमिति होवाच ॥ ६.२.१ ॥

वेत्थ यथेमाः प्रजाः प्रयत्यो विप्रतिपद्यन्ता३ इति । नेति होवाच ।

वेत्थो यथेमं लोकं पुनरापद्यन्ता३ इति । नेति हैवोवाच ।

वेत्थो यथासौ लोक एवं बहुभिः पुनः पुनः प्रयद्भिर्न संपूर्यता३ इति । नेति हैवोवाच ।

वेत्थो यतिथ्यामाहुत्यां हुतायामापः पुरुषवाचो भूत्वा समुत्थाय वदन्ती३ इति । नेति हैवोवाच ।

yati – сколь много, сколь часто (yatitha – прил)

वेत्थो देवयानस्य वा पथः प्रतिपदं पितृयाणस्य वा ।

यत्कृत्वा देवयानं वा पन्थानं प्रतिपद्यन्ते पितृयाणं वा ।

अपि हि न ऋषेर्वचः श्रुतं

द्वे सृती अशृणवं पितृणामहं देवानामुत मर्त्यानाम् ।

ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं चेति ।

नाहमत एकं चन वेदेति होवाच ॥ ६.२.२ ॥

अथैनं वसत्योपमन्त्रयां चक्रे ।

upa√mantraya U. *den.* - звать к себе, приглашать;

अनादृत्य वसतिं कुमारः प्रदुद्राव । स आजगाम पितरम् ।

ā√dar VI Ā. - относиться со вниманием, уважать;

तं होवाच इति वाव किल नो भवान् पुरानुशिष्टानवोच इति ।

कथं सुमेध इति । पञ्च मा प्रश्नान् राजन्यबन्धुरप्राक्षीत् ।

ततो नैकं चन वेदेति । कतमे त इति ।

इम इति ह प्रतीकान्युदाजहार ॥ ६.२.३ ॥

pratīka *n* - поверхность, внешний вид; лицо; образ, символ, копия;

स होवाच तथा नस्त्वं तत जानीथा यथा यदहं किंच वेद सर्वमहं तत्तुभ्यमवोचम् ।

प्रेहि तु तत्र । प्रतीत्य ब्रह्मचर्यं वत्स्याव इति ।

भवानेव गच्छत्विति ।

स आजगाम गौतमो यत्र प्रवाहणस्य जैवलेरास ।

तस्मा आसनमाहृत्योदकमाहारयां चकार । अथ हास्मा अर्घ्यं चकार ।

तं होवाच वरं भगवते गौतमाय दद्म इति ॥ ६.२.४ ॥

स होवाच प्रतिज्ञातो म एष वरः ।

यां तु कुमारस्यान्ते वाचमभाषथास्तां मे ब्रूहीति ॥ ६.२.५ ॥

स होवाच दैवेषु वै गौतम तद्वरेषु ।

मानुषाणां ब्रूहीति ॥ ६.२.६ ॥

स होवाच विज्ञायते हास्ति हिरण्यस्यापात्तं गोअश्वानां दासीनां प्रवाराणां परिधानस्य ।

मा नो भवान् बहोरनन्तस्यापर्यन्तस्याभ्यवदान्यो भूदिति ।

abhyavadānya – лишающий ч.-л. (+Gen.);

स वै गौतम तीर्थेनेच्छासा इति ।

उपैम्यहं भवन्तमिति ।

वाचा ह स्मैव पूर्व उपयन्ति ।

स होपायनकीर्त्योवास ॥ ६.२.७ ॥

स होवाच तथा नस्त्वं गौतम मापराधास्तव च पितामहाः ।

यथेयं विद्येतः पूर्वं न कस्मिंश्चन ब्राह्मन उवास ।

तां त्वहं तुभ्यं वक्ष्यामि ।

को हि त्वैवं ब्रुवन्तमर्हति प्रत्याख्यातुमिति ॥ ६.२.८ ॥

असौ वै लोकोऽग्निर्गौतम । तस्यादित्य एव समित् ।

रश्मयो धूमः । अहरर्चिः । दिशोऽङ्गाराः ।

अवान्तरदिशो विष्फुलिङ्गाः ।

तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति ।

तस्या आहुत्यै सोमो राजा संभवति ॥ ६.२.९ ॥

पर्जन्यो वा अग्निर्गौतम । तस्य संवत्सर एव समित् ।

अभ्राणि धूमः । विद्युदर्चिः । अशनिरङ्गाराः ।

ह्रादुनयो विष्फुलिङ्गाः ।

तस्मिन्नेतस्मिन्नग्नौ देवाः सोमं राजानं जुह्वति ।

तस्या आहुत्यै वृष्टिः संभवति ॥ ६.२.१० ॥

अयं वै लोकोऽग्निर्गौतम । तस्य पृथिव्येव समित् ।

अग्निर्धूमः । रात्रिरर्चिः । चन्द्रमा अङ्गाराः ।

नक्षत्राणि विष्फुलिङ्गाः ।

तस्मिन्नेतस्मिन्नग्नौ देवा वृष्टिं जुह्वति ।

तस्या आहुत्या अन्नं संभवति ॥ ६.२.११ ॥

पुरुषो वा अग्निर्गौतम । तस्य व्यात्तमेव समित् ।

प्राणो धूमः । वागर्चिः । चक्षुरङ्गाराः । श्रोत्रं विष्फुलिङ्गाः ।

तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति ।

तस्या आहुत्यै रेतः संभवति ॥ ६.२.१२ ॥

योषा वा अग्निर्गौतम ।

तस्या उपस्थ एव समित् । लोमानि धूमः । योनिरर्चिः ।

यदन्तः करोति तेऽङ्गाराः ।

अभिनन्दा विष्फुलिङ्गाः ।

तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति ।

तस्या आहुत्यै पुरुषः संभवति ।

स जीवति यावज्जीवति । अथ यदा म्रियते ॥ ६.२.१३ ॥

अथैनमग्नये हरन्ति । तस्याग्निरेवाग्निर्भवति ।

समित्समित् । धूमो धूमः । अर्चिरर्चिः ।

अङ्गारा अङ्गाराः । विष्फुलिङ्गा विष्फुलिङ्गाः ।

तस्मिन्नेतस्मिन्नग्नौ देवाः पुरुषं जुह्वति ।

तस्या आहुत्यै पुरुषो भास्वरवर्णः संभवति ॥ ६.२.१४ ॥

ते य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिरभिसंभवन्ति ।

abhisaṃ√bhū I P. - приходить, достигать;

अर्चिषोऽहः । अह्न आपूर्यमाणपक्षम् ।

आपूर्यमाणपक्षाद्यान् षण्मासानुदङ्ङादित्य एति ।

मासेभ्यो देवलोकम् । देवलोकादादित्यम् । आदित्याद्वैद्युतम् ।

तान् वैद्युतान् पुरुषो मानस एत्य ब्रह्मलोकान् गमयति ।

ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति । तेषां न पुनरावृत्तिः ॥ ६.२.१५ ॥

अथ ये यज्ञेन दानेन तपसा लोकाञ्जयन्ति ते धूममभिसंभवन्ति ।

धूमाद्रात्रिम् । रात्रेरपक्षीयमाणपक्षम् ।

अपक्षीयमाणपक्षाद्यान् षण्मासान् दक्षिणादित्य एति ।

मासेभ्यः पितृलोकम् । पितृलोकाच्चन्द्रम् ।

ते चन्द्रं प्राप्यान्नं भवन्ति ।

तांस्तत्र देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेत्येवमेनांस्तत्र भक्षयन्ति ।

तेषां यदा तत्पर्यवैत्यथेममेवाकाशमभिनिष्पद्यन्ते ।

आकाशाद्वायुम् । वायोर्वृष्टिम् । वृष्टेः पृथिवीम् ।

ते पृथिवीं प्राप्यान्नं भवन्ति ।

ते पुनः पुरुषाग्नौ हूयन्ते ततो योषाग्नौ जायन्ते ।

लोकान् प्रत्युथायिनस्त एवमेवानुपरिवर्तन्ते ।

अथ य एतौ पन्थानौ न विदुस्ते कीटाः पतङ्गा यदिदं दन्दशूकम् ॥ ६.२.१६ ॥

इति बृहदारण्यकोपनिषदि षष्ठाध्यायस्य द्वितीयं ब्राह्मणम् ॥२॥

स यः कामयेत महत्प्राप्नुयामित्युदगयन आपूर्यमाणपक्षस्य पुण्याहे द्वादशाहमुपसद्व्रती भूत्वौदुम्बरे कंसे चमसे वा सर्वौषधं फलानीति संभृत्य

udag-ayana – идущий на север;
upasad *f* – название жертвенной церемонии;
kaṃsa *m* – сосуд, кубок;

परिसमुह्य परिलिप्याग्निमुपसमाधाय परिस्तीर्यावृताज्यं संस्कृत्य पुंसा नक्षत्रेण मन्थं संनीय जुहोति

pari√star V U. - обкладывать, окружать; окутывать, покрывать;
āvṛta – покрытый, скрытый, окруженный; наполненный, изобилующий;
saṃ√nī I U. – объединять, возвращать;

यावन्तो देवास्त्वयि जातवेदस्तिर्यञ्चो घ्नन्ति पुरुषस्य कामान् ।

तेभ्योऽहं भागधेयं जुहोमि ते मा तृप्ताः सर्वैः कामैस्तर्पयन्तु स्वाहा ।

या तिरश्ची निपद्यसेऽहं विधरणी इति ।

तां त्वा घृतस्य धारया यजे संराधनीमहं स्वाहा ॥ ६.३.१ ॥

saṃrādhana – удовлетворенный, обрадованный;

ज्येष्ठाय स्वाहा श्रेष्ठाय स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ।

mantha *m* - смесь, напиток из разных компонентов; размешивание;
saṃsrava *m* – остаток; смешанный остаток жидкостей;
ava√nī I U. – сливать, вливать во ч.-л.;

प्राणाय स्वाहा वसिष्ठायै स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ।

वाचे स्वाहा प्रतिष्ठायै स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ।

चक्षुषे स्वाहा संपदे स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ।

श्रोत्राय स्वाहायतनाय स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ।

मनसे स्वाहा प्रजात्यै स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ।

रेतसे स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ॥ ६.३.२ ॥

अग्नये स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ।

सोमाय स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ।

भूः स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ।

भुवः स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ।

स्वः स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ।

भूर्भुवः स्वः स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ।

ब्रह्मणे स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ।

क्षत्राय स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ।

भूताय स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ।

भविष्यते स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ।

विश्वाय स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ।

सर्वाय स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ।

प्रजापतये स्वाहेत्यग्नौ हुत्वा मन्थे संस्रवमवनयति ॥ ६.३.३ ॥

अथैनमभिमृशति भ्रमदसि । ज्वलदसि । पूर्णमसि ।

प्रस्तब्धमसि । एकसभमसि । हिङ्कृतमसि ।

ekasabha *n* – место встречи, прибежище;
hiṅ – мычание, звук, издаваемый коровой при поиске теленка; звук для ритуалов;

हिङ्क्रियमानमसि । उद्गीथमसि । उद्गीयमानमसि ।

श्रावितमसि । प्रत्याश्रावितमसि । आर्द्रे संदीप्तमसि ।

विभूरसि । प्रभूरसि । अन्नमसि ।

ज्योतिरसि । निधनमसि । संवर्गोऽसीति ॥ ६.३.४ ॥

saṃvarga *m* – собирание ч.-л.; пожирание, поглощение

अथैनमुद्यच्छत्यामंस्यामं हि ते महि स हि।

स हि राजेशानोऽधिपतिः ।

स मां राजेशनोऽधिपतिं करोत्विति ॥ ६.३.५ ॥

अथैनमाचामति तत्सवितुर्वरेण्यम् ।

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।

√ṛtāya *den.* P. – поддерживать священный закон; желать речи, желать жертвоприношения;
√kṣar I P. – сочиться, течь;

माध्वीर्नः सन्त्वोषधीः ।

भूः स्वाहा । भर्गो देवस्य धीमहि

मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः ।

मधु द्यौरस्तु नः पिता ।

भुवः स्वाहा ।

धियो यो नः प्रचोदयात् ।

मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः ।

माध्वीर्गावो भवन्तु नः ।

स्वः स्वाहा ।

सर्वां च सावित्रीमन्वाह । सर्वाश्च मधुमतीरहमेवेदं सर्वं भूयासं

भूर्भुवः स्वः स्वाहेति अन्तत आचम्य पाणी प्रक्षाल्य जघनेनाग्निं प्राक्शिराः संविशति ।

jaghana *m, n* – зад, задняя часть;

प्रातरादित्यमुपतिष्ठते ।

दिशामेकपुण्डरीकमसि ।

अहं मनुष्याणामेकपुण्डरीकं भूयासमिति ।

यथेतमेत्य जघनेनाग्निमासीनो वंशं जपति ॥ ६.३.६ ॥

तं हैतमुद्दालक आरुणिर्वाजसनेयाय याज्ञवल्क्यायान्तेवासिन उक्त्वोवाच

antevāsin *m* – ученик, слуга, подмастерье;

अपि य एनं शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ६.३.७ ॥

sthāṇu *m* – ствол дерева, пень, столб;

एतमु हैव वाजसनेयो याज्नवल्क्यो मधुकाय पैङ्ग्यायान्तेवासिन उक्त्वोवाच

अपि य एनं शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ६.३.८ ॥

एतमु हैव मधुकः पैङ्ग्यश्चूलाय भागवित्तयेऽन्तेवासिन उक्त्वोवाच

अपि य एनं शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ६.३.९ ॥

एतमु हैव चूलो भागवित्तिर्जानकय आयःस्थूणायान्तेवासिन उक्त्वोवाच

अपि य एनं शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ६.३.१० ॥

एतमु हैव जानकिरायस्थूणः सत्यकामाय जाबालायान्तेवासिन उक्त्वोवाच

अपि य एनं शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ६.३.११ ॥

एतमु हैव सत्यकामो जाबालोऽन्तेवासिभ्य उक्त्वोवाचा

अपि य एनं शुष्के स्थाणौ निषिञ्चेज्जायेरञ्छाखाः प्ररोहेयुः पलाशानीति ।

तमेतं नापुत्राय वानन्तेवासिने वा ब्रूयात् ॥ ६.३.१२ ॥

चतुरौदुम्बरो भवति ।

औदुम्बरः स्रुव औदुम्बरश्चमस औदुम्बर इध्म औदुम्बर्या उपमन्थन्यौ ।

upamanthanī *f* – мутовка; палка для размешивания;

दश ग्राम्याणि धान्यानि भवन्ति ।

व्रीहियवास्तिलमाषा अणुप्रियंगवो गोधूमाश्च मसूराश्च खल्वाश्च खलकुलाश्च ।

tila *m* - кунжут, сезам; семя, зёрнышко;
māṣa *m* – боб;
aṇu *m* – просо;
priyaṃgu *m, f* – черная горчица;
godhūma *m* – пшеница;
masūra *m* – чечевица;
khalva *m* – вид злака; семя из стручка;
khalakula *m* – фасоль;

तान् पिष्टान् दधनि मधुनि घृत उपसिञ्चति ।

आज्यस्य जुहोति ॥ ६.३.१३ ॥

इति बृहदारण्यकोपनिषदि षष्ठाध्यायस्य तृतीयं ब्राह्मणम् ॥२॥

एषां वै भूतानां पृथिवी रसः । पृथिव्या आपः । अपामोषधयः ।

ओषधीनां पुष्पाणि । पुष्पाणां फलानि । फलानां पुरुषः ।

पुरुषस्य रेतः ॥ ६.४.१ ॥

स ह प्रजापतिरीक्षां चक्रे हन्तास्मै प्रतिष्ठां कल्पयानीति स स्त्रियं ससृजे ।

तां सृष्ट्वाध उपास्त ।

upās (upa√ās) II Ā. – сидеть, ждать; почитать; приближаться, соединяться, иметь сношения с к.-л.;

तस्मात्स्त्रियमध उपासीत ।

स एतं प्राञ्चं ग्रावाणमात्मन एव समुदपारयत् ।

grāvan *m* – давильный камень (для выжимания Сомы);
samut√pāraya (*caus. от* samut√pṛ) – распространять, простирать;

तेनैनामभ्यसृजत ॥ ६.४.२ ॥

abhi√sarj VI P. – изливать, выпускать;

तस्या वेदिरुपस्थः । लोमानि बर्हिश् । चर्माधिषवणे ।

adhiṣavaṇa *n (обычно du.)* – ручной пресс для извлечения и процеживания сомы;

समिद्धो मध्यतस्तौ मुष्कौ ।

muṣka *m* – яйцо, мошонка; (du.) женские наружные половые органы;

स यावान् ह वै वाजपेयेन यजमनस्य लोको भवति तावानस्य लोको भवति

vājapeya *m, n* - обряд жертвоприношения сомы;

य एवं विद्वानधोपहासं चरत्यासां स्त्रीणां सुकृतं वृङ्क्ते ।

√vṛj VII Ā. - выбирать, отбирать для себя, присваивать;

अथ य इदमविद्वानधोपहासं चरत्यास्य स्त्रियः सुकृतं वृञ्जते ॥ ६.४.३ ॥

एतद्ध स्म वै तद्विद्वानुद्दालक आरुनिराह ।

एतद्ध स्म वै तद्विद्वान्नाको मौद्गल्य आह ।

nāka maudgalya - *nom.pr.;*

एतद्ध स्म वै तद्विद्वान् कुमारहारित आह

kumārahārita - *nom.pr.;*

बहवो मर्या ब्राह्मनायना निरिन्द्रिया विसुकृतोऽस्माल्लोकात्प्रयन्ति य इदमविद्वांसोऽधोपहासं चरन्तीति ।

बहु वा इदं सुप्तस्य वा जाग्रतो वा रेतः स्कन्दति ॥ ६.४.४ ॥

√skand I P. - прыгать, выбрасывать (пламя), капать;

तदभिमृशेदनु वा मन्त्रयेत

यन्मेऽद्य रेतः पृथिवीमस्कान्त्सीद्यदोषधीरप्यसरद्यदपः ।

इदमहं तद्रेत आददे ।

पुनर्मामैतु इन्द्रियं पुनस्तेजः पुनर्भगः ।

पुनरग्निर्धिष्ण्या यथास्थानं कल्पन्ताम् ।

dhiṣṇya *m* - название восьми боковых алтарей, на которых зажигают огонь;

इत्यनामिकाङ्गुष्ठाभ्यामादायान्तरेण स्तनौ वा भ्रुवौ वा निमृज्यात् ॥ ६.४.५ ॥

अथ यद्युदक आत्मानं पश्येत्तदभिमन्त्रयेत मयि तेज इन्द्रियं यशो द्रविणं सुकृतमिति ।

श्रीर्ह वा एषा स्त्रीणां यन्मलोद्वासाः ।

तस्मान्मलोद्वाससं यशस्विनीमभिक्रम्योपमन्त्रयेत ॥ ६.४.६ ॥

सा चेदस्मै न दद्यात्काममेनामवक्रिणीयात् ।

सा चेदस्मै नैव दद्यात्काममेनां यष्ट्या वा पाणिना वोपहत्यातिक्रामेत् ।

इन्द्रियेन ते यशसा यश आदद इति ।

अयशा एव भवति ॥ ६.४.७ ॥

सा चेदस्मै दद्यादिन्द्रियेण ते यशसा यश आदधामीति ।

यशस्विनावेव भवतः ॥ ६.४.८ ॥

स यामिच्छेत् कामयेत मेति तस्यामर्थं निष्ठाय मुखेन मुखं संधायोपस्थमस्या अभिमृश्य जपेत्

अङ्गादङ्गात्संभवसि हृदयादधिजायसे ।

स त्वमङ्गकषायोऽसि दिग्धविद्धामिव मादयेमाममूं मयीति ॥ ६.४.९ ॥

kaṣāya *m* – краснота; страсть;
dhigdha (p.p. от √dih) – намазанный;

अथ यामिच्छेन्न गर्भं दधीतेति तस्यामर्थं निष्ठाय मुखेन मुखं संधायाभिप्राण्यापान्यात् ।

इन्द्रियेण ते रेतसा रेत आदद इति ।

अरेता एव भवति ॥ ६.४.१० ॥

अथ यामिच्छेद्दधीतेति तस्यामर्थं निष्ठाय मुखेन मुखं संधायापान्याभिप्राण्यात् ।

इन्द्रियेण ते रेतसा रेत आदधामीति ।

गर्भिण्येव भवति ॥ ६.४.११ ॥

अथ यस्य जायायै जारः स्यात्तं चेद्द्विष्यादामपात्रेऽग्निमुपसमाधाय प्रतिलोमं शरबर्हिः स्तीर्त्वा तस्मिन्नेताः शरभृष्टीः प्रतिलोमाः सर्पिषाक्ता जुहुयात् ।

jāra *m* - любовник;
āma – сырой, неварёный;
bhṛṣṭi *f* – зубец, острие, угол;
sarpis *n* - топленое масло;
akta (p.p. от √añj) – смазанный, окрашенный;

मम समिद्धेऽहौषीः । प्राणापानौ त आददेऽसाविति ।

मम समिद्धेऽहौषीः । पुत्रपशूंस्त आददेऽसाविति ।

मम समिद्धेऽहौषीः । इष्टासुकृते त आददेऽसाविति ।

मम समिद्धेऽहौषीः ।अशापराकाशौ त आददेऽसाविति ।

parākāśa *n* – отдалённое ожидание;

स वा एष निरिन्द्रियो विसुकृतोऽस्माल्लोकात्प्रैति यमेवंविद्ब्राह्मणः शपति ।

तस्मादेवंवित्श्रोत्रियस्य दारेण नोपहासमिच्छेत् ।

upahāsa *m* - смех, насмешка, веселье, игра;

उत ह्येवंवित्परो भवति ॥ ६.४.१२ ॥

अथ यस्य जायामार्तवं विन्देत्त्र्यहं कंसे न पिबेत् । अहतवासाः ।

नैनां वृषलो न वृषल्यपहन्यात् ।

त्रिरात्रान्त आप्लुत्य व्रीहीनवघातयेत् ॥ ६.४.१३ ॥

ava√ghātaya (caus. от ava√han) – молотить;

स य इच्छेत् पुत्रो मे शुक्लो जायेत वेदमनुब्रुवीत सर्वमायुरियादिति

क्षीरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयाताम् । ईश्वरौ जनयितवै ॥ ६.४.१४ ॥

अथ य इच्छेत् पुत्रो मे कपिलः पिङ्गलो जायेत द्वौ वेदावनुब्रुवीत सर्वमायुरियादिति

दध्योदनं पाचयित्वा सर्पिष्मन्तमश्नीयाताम् । ईश्वरौ जनयितवै ॥ ६.४.१५ ॥

अथ य इच्छेत् पुत्रो मे श्यामो लोहिताक्षो जायेत त्रीन् वेदाननुब्रुवीत सर्वमायुरियादिति

उदौदनं पाचयित्वा सर्पिष्मन्तमश्नीयाताम् । ईश्वरौ जनयितवै ॥ ६.४.१६ ॥

अथ य इच्छेद् दुहिता मे पण्डिता जायेत सर्वमायुरियादिति

तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयाताम् । ईश्वरौ जनयितवै ॥ ६.४.१७ ॥

अथ य इच्छेत् पुत्रो मे पण्डितो विगीतः समितिंगमः शुश्रूषितां वाचं भाषिता जायेत सर्वान् वेदाननुब्रुवीत सर्वमायुरियादिति

मांसौदनं पाचयित्वा सर्पिष्मन्तमश्नीयाताम् । ईश्वरौ जनयितवै । औक्षेण वार्षभेण वा ॥ ६.४.१८ ॥

अथाभिप्रातरेव स्थालीपाकावृताज्यं चेष्टित्वा स्थालीपाकस्योपघातं जुहोत्य्

sthālīpāka *m* - церемония подношения риса, сваренного в молоке;
upaghāta *m* - вид подношения или жертвоприношения;

अग्नये स्वाहानुमतये स्वाहा देवाय सवित्रे सत्यप्रसवाय स्वाहेति ।

anumati *f* – одобрение, согласние; *nom.pr.* богиня Анумати (персонификация милости);

हुत्वोद्धृत्य प्राश्नाति । प्राश्येतरस्याः प्रयच्छति ।

प्रक्षाल्य पाणी उदपात्रं पूरयित्वा तेनैनां त्रिरभ्युक्षति

उत्तिष्ठातो विश्वावसोऽन्यामिच्छ प्रपूर्व्याम् ।

viśvāvasu *m* – *nom.pr.* имя гандхарва, который считается супругом непосватанных девушек;

सं जायां पत्या सहेति ॥ ६.४.१९ ॥

saṃ√sah тут вместо saṃ√sṛj (ср. оригинал RV 10.85.22)

अथैनामभिपद्यते अमोऽहमस्मि सा त्वम् ।

ama – этот; *m* душа, жизненное дыхание;

सा त्वमस्यमोऽहम् ।

सामाहमस्मि ऋक्त्वम् । द्यौरहं पृथिवी त्वम् ।

तावेहि संरभावहै सह रेतो दधावहै ।

पुंसे पुत्राय वित्तय इति ॥ ६.४.२० ॥

अथास्या ऊरू विहापयति विजिहीथां द्यावापृथिवी इति ।

तस्यामर्थं निष्ठाय मुखेन मुखं संधाय त्रिरेनामनुलोमामनुमार्ष्टि

विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु । RV 10.184

√piś (piṃś) VI P. – обтесывать, высекать, украшать;

आ सिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ।

गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके ।

sinīvālī *f – nom.pr.* ведийская богиня, дающая плодородие и облегчающая роды;
stukā *f* – пучок волос;

गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ ६.४.२१ ॥

हिरण्मयी अरणी याभ्यां निर्मन्थतामश्विनौ ।

araṇi *f* - дощечка для добывания огня трением;

तं ते गर्भं हवामहे दशमे मासि सूतये ।

यथाग्निगर्भा पृथिवी यथा द्यौरिन्द्रेण गर्भिणी ।

वायुर्दिशां यथा गर्भ एवं गर्भं दधामि तेऽसाविति ॥ ६.४.२२ ॥

सोष्यन्तीमद्भिरभ्युक्षति

यथा वायुः पुष्करिणीं समिङ्गयति सर्वतः ।

sam√iṅgaya *caus.* – заставлять двигаться, колебать;

एवा ते गर्भ एजतु सहावैतु जरायुणा ।

jarāyu *n* – наружная оболочка зародыша;

इन्द्रस्यायं व्रजः कृतः सार्गलः सपरिश्रयः ।

vraja *m* – загон для скота;
argala *m, n* – задвижка, засов; препятствие, помеха;
pariśraya *m* – ограда;

तमिन्द्र निर्जहि गर्भेण सावरां सहेति ॥ ६.४.२३ ॥

जातेऽग्निमुपसमाधायाङ्क आधाय कंसे पृषदाज्यं संनीय पृषदाज्यस्योपघातं जुहोति

अस्मिन्सहस्रं पुष्यासमेधमानः स्वे गृहे ।

√edh I Ā. – расти, увеличиваться; преуспевать;

अस्योपसन्द्यां मा छैत्सीत्प्रजया च पशुभिश्च स्वाहा ।

upasandya - которому необходимо служить

मयि प्राणांस्त्वयि मनसा जुहोमि स्वाहा ।

यत्कर्मणात्यरीरिचं यद्वा न्यूनमिहाकरम् ।

nyūna – недостающий, слишком маленький, ограниченный;

अग्निष्टत्स्विष्टकृद्विद्वान् स्विष्टं सुहुतं करोतु नः स्वाहेति ॥ ६.४.२४ ॥

अथास्य दक्षिणं कर्णमभिनिधाय वाग्वागिति त्रिः ।

अथ दधि मधु घृतं संनीयानन्तर्हितेन जातरूपेण प्राशयति ।

jātarūpa *n* – золото;

भूस्ते दधामि भुवस्ते दधामि स्वस्ते दधामि भूर्भुवः स्वः सर्वं त्वयि दधामीति ॥ ६.४.२५ ॥

अथास्य नाम करोति वेदोऽसीति ।

तदस्यैतद्गुह्यमेव नाम भवति ॥ ६.४.२६ ॥

अथैनं मात्रे प्रदाय स्तनं प्रयच्छति

यस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः ।

śaśaya – неиссякаемый, обильный
mayobhū – живительный, освежающий;
vasuvid – дающий богатство
sudatra – дающий богатые дары;

येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवे करिति ॥ ६.४.२७ ॥

अथास्य मातरमभिमन्त्रयते ।

इलासि मैत्रावरुणी वीरे वीरमजीजनत् ।

सा त्वं वीरवती भव यास्मान् वीरवतोऽकरदिति ।

तं वा एतमाहुः अतिपिता बताभूः ।

अतिपितामहो बताभूः ।

परमां बत काष्ठां प्राप श्रिया यशसा ब्रह्मवर्चसेन ।

य एवंविदो ब्राह्मणस्य पुत्रो जायत इति ॥ ६.४.२८ ॥

इति बृहदारण्यकोपनिषदि षष्ठाध्यायस्य चतुर्थं ब्राह्मणम् ॥४॥

अथ वंशः ।

पौतिमाषीपुत्रः कात्यायनीपुत्रात् ।

कात्यायनीपुत्रो गौतमीपुत्रात् ।

गौतमीपुत्रो भारद्वाजीपुत्रात् ।

भारद्वाजीपुत्रः पाराशरीपुत्रात् ।

पाराशरीपुत्र औपस्वस्तीपुत्रात् ।

औपस्वस्तीपुत्रः पाराशरीपुत्रात् ।

पाराशरीपुत्रः कात्यायनीपुत्रात् ।

कात्यायनीपुत्रः कौशिकीपुत्रात् ।

कौशिकीपुत्र आलम्बीपुत्राच्च वैयाघ्रपदीपुत्राच्च ।

वैयाघ्रपदीपुत्रह्काण्वीपुत्राच्च कापीपुत्राच्च ।

कापीपुत्रः ॥ ६.५.१ ॥

आत्रेयीपुत्रात् ।

आत्रेयीपुत्रो गौतमीपुत्रात् ।

गौतमीपुत्रो भारद्वाजीपुत्रात् ।

भारद्वाजीपुत्रः पाराशरीपुत्रात् ।

पाराशरीपुत्रो वात्सीपुत्रात् ।

वात्सीपुत्रः पाराशरीपुत्रात् ।

पाराशरीपुत्रो वार्कारुनीपुत्रात् ।

वार्कारुणीपुत्रो वार्कारुणीपुत्रात् ।

वार्कारुणीपुत्र आर्तभागीपुत्रात् ।

आर्तभागीपुत्रः शौङ्गीपुत्रात् ।

शौङ्गीपुत्रः सान्कृतीपुत्रात् ।

साङ्कृतीपुत्र आलम्बायनीपुत्रात् ।

आलम्बायनीपुत्र आलम्बीपुत्रात् ।

आलम्बीपुत्रो जायन्तीपुत्रात् ।

जायन्तीपुत्रो माण्डूकायनीपुत्रात् ।

माण्डूकायनीपुत्रो माण्डूकीपुत्रात् ।

माण्डूकीपुत्रः शाण्डिलीपुत्रात् ।

शाण्डिलीपुत्रो राथीतरीपुत्रात् ।

राथीतरीपुत्रो भालुकीपुत्रात् ।

भालुकीपुत्रः क्रौञ्चिकीपुत्राभ्याम् ।

क्रौञ्चिकीपुत्रौ वैदभृतीपुत्रात् ।

वैदभृतीपुत्रः कार्शकेयीपुत्रात् ।

कार्शकेयीपुत्रः प्राचीनयोगीपुत्रात् ।

प्राचीनयोगीपुत्रः साञ्जीवीपुत्रात् ।

साञ्जीवीपुत्रः प्राश्नीपुत्रादासुरिवासिनः ।

प्राश्नीपुत्र आसुरायणात् ।

आसुरायण आसुरेः ।

आसुरिः। ६.५.२ ॥

याज्ञवल्क्यात् ।

याज्ञवल्क्य उद्दालकात् ।

उद्दालकोऽरुणात् ।

अरुण उपवेशेः ।

उपवेशिः कुश्रेः ।

कुश्रिर्वाजश्रवसः ।

वाजश्रवा जीह्वावतो बाध्योगात् ।

जीह्वावान् बाध्योगोऽसिताद्वार्षगणात् ।

असितो वार्षगणो हरितात्कश्यपात् ।

हरितः कश्यपः शिल्पात्कश्यपात् ।

शिल्पः कश्यपः कश्यपान्नैध्रुवेः ।

कश्यपो नैध्रुविर्वाचः ।

वागम्भिण्याः ।

अम्भिण्यादित्यात् ।

आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ॥ ६.५.३ ॥

समानमा साञ्जीवीपुत्रात् ।

सञ्जिवीपुत्रो माण्डूकायनेः ।

माण्डूकायनिर्माण्डव्यात् ।

माण्डव्यः कौत्सात् ।

कौत्सो माहित्थेः ।

माहित्थिर्वामकक्षायणात् ।

वामकक्षायणः शाण्डिल्यात् ।

शाण्डिल्यो वात्स्यात् ।

वात्स्यः कुश्रेः ।

कुश्रिर्यज्ञवचसः राजस्तम्बायनात् ।

यज्ञवचा राजस्तम्बायनः तुरात्कावषेयात् ।

तुरः कावषेयः प्रजापतेः ।

प्रजापतिर्ब्रह्मणः ।

ब्रह्म स्वयंभु ।

ब्रह्मणे नमः ॥ ६.५.४ ॥

इति बृहदारण्यकोपनिषदि षष्ठाध्यायस्य पञ्चमं ब्राह्मणम् ॥५॥

इति वाजसनेयके बृहदारण्यकोपनिषदि षष्ठोध्यायः ॥६॥

इति वाजसनेयकेबृहदारण्यकक्रमेणाष्टमोऽध्यायः ॥८॥

इति शुक्लयजुर्वेदीया बृहदारण्यकोपनिषत्संपूर्णा

ओं पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ओं शान्तिः शान्तिः शान्तिः